रधूसरौ॥ १८॥ हारकेयूरवलयकुंडलादिविभूषणं॥ हेमरत्नमयंसर्वंरुद्रा
क्षान्दधतुस्तनौ॥ १९॥ रुद्राक्षमालिनौनित्यंरुद्राक्षकरकंकणौ॥ रुद्राक्षकंठाभ
रणौधृतरुद्राक्षकुंडलौ॥ २०॥ हेमरत्नादिघनलंकारेलोष्टपाषाणदर्शिनौ॥ बाल्य
मात्रावसद्रुद्राक्षांस्तुनमुंचतः॥ २१॥ तस्यकाश्मीरराजस्यगृहंप्रासादपूछपा॥
पराशरोमुनिवरःसाक्षादेवपितामहः॥ २२॥ तमर्चयित्वाविधिवद्राजाधर्मभृतांवरः॥
पप्रच्छसुखमासीनंत्रिकालज्ञंमहामुनिं॥ २३॥ राजोवाच॥ भगवन्नेषपुत्रोमेसोपि

मंत्रीसुतश्चमे॥ रुद्राक्षधारिणो नित्यंरत्नाभरणभूषितौ॥ शास्यमानावपिसदा रत्ना
कल्पापरिग्रहौ॥२५॥ लिखितास्मदचनो रुद्राक्षेवचनसरो २नोपदिष्टोविमो
क्षालोकश्चिदपिकेनचित्॥ एषास्याभाविकीस्थितिः कथमारीलुमारयोः॥२७॥
पराशरउवाच॥ शृणुराजन्प्रवक्ष्यामिनवपूजास्यधीमतः॥ तथात्वंत्रिपुजास्यप्र
तिमिस्मयाग्रहं॥२८॥ नंदिग्रामपुराकश्चित् माहानंद्रेविविश्रुता॥ बभूववारव
निताश्रेणारत्नलिनाहिसा॥२९॥ छिन्नभूर्णदूसंकाशोमानंवस्त्रंनिभूषितं॥ मा
मराणिसुदंशानिपादुकेचहिरण्मये॥३०॥ अंबराणिविचित्राणिमहार्हाणिशुभंतिच॥
चंद्ररश्मिनिभाशय्यापर्यंकाश्चहिरण्मयाः॥ गावोमहिहिष्यः रातशोदास्यश्चबहु
संमताः॥ सर्वोपारणदिताग्रा दासाश्चनवयोवनाः॥ भूषणानिपराण्यानि नवरत्ना

कलानिच॥ भगंधकुंकुमकस्तूरी कर्पूरागरुलेपनं॥३१॥ चित्रमाल्यावतंसश्च
यथेष्टंमृष्टभोजनं॥ नानारत्नविनाकल्पंनानाधान्यसमंगृहं॥३२॥ बहुरत्नसह
स्राढ्यंकोटिसंख्यादिकंधनं॥ एवंविधवरंपत्नासावेरूपानाधमध्यगा॥३५॥
रुद्राक्षैर्भूषितंनेत्रंभ्रकुटंचैवकुंकुटं॥ करतालेश्रृंगीनेश्च सदानर्तपरिप्रियं॥३६॥
पुनश्चविहसन्नेत्रैःसखिभिपरिवारिता॥ रुद्राक्षैःकृतकेयूरकर्णाभरणमंडलं॥
॥३७॥ मर्कटःशीघ्रदानस्यापुरोन्रृत्यतिबालवत्॥ शिरस्यग्रेबद्धरुद्राक्षः कुर्कुटः
सखिना॥३८॥ स्थिरंनृत्यतिचन्नरःपश्यतांहितमाहरत्॥ एकदासदनेतस्याः वश्यिहे
तुः शिवव्रती॥३९॥ आजगामसरुद्राक्षस्त्रिपुंडोजटिलोवृषि॥ तंदृष्ट्वाभद्रमित्युक्त्वा
प्रकोष्टेकरबंधनं॥४०॥ महारत्नमयःसोपिकंकणस्तुकरेस्थितः॥ मनोहरतिसाधु

हि॥६॥ दिव्यस्त्रीभूषणोचिते॥७१॥ इतिनानारत्नाढ्येस्थलेकंकणभूषणे॥विप्रो दारमतिर्वेश्यःसस्मितंसमभाषत॥७२॥ अस्मिन्नरत्नेरदिव्येयदितेस्थेहमनः॥ त्वमत्रास्यसुप्रीतामेन्यमस्यददासिकिं॥७३॥ वेश्योवाच॥वयंहिस्वैरचारिण्यावेश्यास्तुनपतिव्रताः॥अस्मत्कुलोचितोधर्मोव्यभिचारोनसंशयः॥ ॥७४॥ यद्येतत्फलरत्नेनदासिकरभूषणं॥दिनत्रयमहोरात्रंनपत्नीभवाम्यहं॥७५॥ वेश्योवाच॥नयास्यत्यधितंसत्यंवचनंवारवल्लभे॥ दासिरत्नंवरंस्त्रीणांनमनस्तुध्रुवः॥७६॥ एतस्मिन्व्यवहारेतुप्रमाणंज्ञास्यसेध्रुवं॥स्त्रीरत्नंसर्वपित्रुक्तंहृदयंमेपरंप्रिये॥७७॥ वेश्योवाच॥दिनत्रयमहोरात्रंपत्नीभूत्वापतिव्रता॥सहधर्मंचरात्यंतंयद्यद्रूपमथोत्तमं॥७८॥ तुष्टमनस्सावेश्यस्तं

प्रददौरत्नकंकणं॥लिंगंरत्नमयंतस्यैदत्वेदमब्रवीत्॥७९॥इदंरत्नमयंलिंगं शोभनंमणिसंन्निभं॥रक्षणीयंत्वयाकांतेनस्थेयंनिर्मलंनिर्मम॥८०॥ एवमुक्त्वातुसा कांतालिंगमादायरत्नजं॥ नाधमंउपिकामध्येनिधायप्राविशद्गृहं॥८१॥सातेन संगतारात्रौनानोपायविधर्मिणा॥सुरतंसुष्ठुसंपाप्यपर्यंकेमृदुतल्पगा॥८२॥ तस्मिन्निशिथसमयेनाधमंउपिकांतरे॥अकस्माद्दुःखितावद्धिस्वामेवसहसावृणोत्॥८३॥ मंडपदत्तमानंतुसहसोत्थायसंभ्रमात्॥मर्कटोमोचयामासस्वावेश्यातत्रबंधनात्॥८४॥ समर्कटोमुक्तबंधःकर्षुटेनसहामुना॥नीतोदूरंविद्रुत्यविधूयाग्निकणान्बहून्॥८५॥ स्वप्नेनसहनिर्दग्धंतल्लिंगंशकलीकृतं॥तथावेश्याश्चवेश्याचदुरंतंदुःखमापदं॥८६॥ दृष्ट्वाप्राणमयंलिंगंदग्धंवेश्यतिदुर्मतिः॥

स्वयमप्यालनिर्वेदान्मरणायमतिं दधे॥५७॥निर्विण्णांतरांवेदादेश्यस्तामाहदुः
खितः॥शिवालंगेतुर्भिन्नेनाहंजीतुमुत्सहे॥५८॥चिंताकार्यमभूत्तवमृ
त्यैर्बलाधिकैः॥शिवमनःसमाविश्यप्रविश्यामिदुताशने॥५९॥यदिन्नलेतवि
श्वाप्याधारयेयुरमत्यमां॥तथाप्यस्मिन्क्षणेवीरःप्रविष्याग्नेयजाम्यसुवा
॥६०॥नमेवदृढनिर्बंधंसाविज्ञायसुदुःखिता॥स्वपतेःकारयामासस्वचि
तास्वभवनाद्बहिः॥६१॥ततःसर्वेश्यःशिवभक्तियुक्तःप्रदक्षणीकृत्यमिस्वमग्निं
विवेशपश्यत्सुजनेषुधीरःसाचानुतापंयुक्ती प्रपेदे॥६२॥साजगत्सादुःखिता
नारीस्वलाधर्मसुनिर्मलं॥सर्वान्बंधूजनान्वीक्ष्यबभाषेकरुणंवचः॥६३॥
रत्नकंकणमादायमयासत्यमुदाहृतं॥दिनत्रयमहंपत्नीनैश्यस्यामुक्तसंमता॥६४॥

कर्मणामलक्तेनायंमृतोवेरूपःशिवव्रती॥तस्माद्दहंभविष्यामिसहानेनहुताशने॥६५॥
सधर्मचारिणीस्त्रीकंसत्यंतहिनपश्यति॥सत्येनतत्समायांतिदेवास्त्रिभुवनेश्व
राः॥६६॥सत्यान्नपरोधर्मोसत्यंसर्वंचधीष्ठितं॥सत्येनस्वर्गमोक्षोपिनासत्ये
नपरागतिः॥६७॥तस्मात्संसमाश्रित्यविष्यामिहुताशने॥इतिसादृढनिर्बंधा
चार्यमाणापिबंधुभिः॥६७॥सत्यलोकप्रभापत्नीप्राणान्स्वकुमकोदधे॥सर्वेस्व
द्विजमुख्येभ्योदत्वाभालासदाशिवं॥६८॥नमस्तेस्त्रिःपरिक्रम्यप्रदक्षाग्निमु
खंतदा॥तोदंपतीसमिल्लग्नौस्वपदार्पितमानसं॥६९॥वारयामासविश्वात्मा
जगदूर्मूनःसदाशिवः॥सानंदिलोकयन्सिलदेवंत्रिलोचनंचंद्रकलावतंसं॥

रा इंद्राक सूर्यानल कोटि सूर्य सम्पत्त भेव मीतवनधनस्थो॥ ७२॥ तां विरलां
प्रयत्नस्तां वेषमानंजजी रुतिं। समाश्यास्यग लेबाष्पांकरंग्रह्यान्नवीद्वच:॥
सर्वं धर्मं च धैर्यं चमु क्तिं चमयिलब्ध निश्चलं॥ परिहितुलसकाशंवेश्यामूला
हमागत:॥ ७४॥ मायया निसमूलाय दग्धंतन्नाद्यमंजप॥ दग्धं कृत्वास्तनिंग्रवि
ष्टोस्मिकृताज्ञानं॥ ७५॥ वेश्या: केतनकारिण्यास्चरिण्यादश्वंचका:॥ सालंसत्यम
नुस्मृत्य प्रविष्टानिसलस्त्रश:॥ अनरतंसंभवत्पापि भाग्यस्त्रिदशदुर्लभान्॥
आयुश्चपरमंदीर्घं उारोग्यंचप्रियोजनं॥ यथादिष्टसिसुश्रोणि तत्तदददामि
ते॥ इतिब्रुवतिगोरिंद्रे सार्वेश्यास्तमाषत॥ नमवांछासितभागेषु प्रभो स्वर्गसा

नले॥ तवपादांबुजस्पर्शादन्यकिंचिन्नकामयेत्॥ ७९॥ एतत्फलाश्चेयेचान्ये सु
खदाममबांधवा॥ सर्वेलब्धनपरा स्तपिसंस्तवदक्षय:॥ ८०॥ स्त्रीनेतामया
मयासार्धंनीलातवपरंपदं॥ पुनर्जन्मजरयंघोरं विमोचयनमोस्तुते॥ ८१॥ नथे
तिस्यावचनंप्रतिनेधसहेश्वर:॥ तास्सार्वान्तयासार्धंनिनायस्वपदंपरं॥ ८२॥
पराशरउवाच॥ नाद्यमंजपि कारादे योदूरं विहतोपुरा॥ तत्रावशिष्टोतोवन
कुर्वंतोमर्कटस्तथा॥ ८३॥ कालेननिधनंप्राप्य सतस्यानाद्यमर्कट:॥ आसीतवकु
रो भूत्वकुर्कुरोमंत्रिण:सुत:॥ ८४॥ रुक्षास्यधारिणोभूतान्पुण्यान्पुण्यफलार्जितो
न॥ कुलेप्रावतिसंजातो जातोतो बालकाविभो॥ पूर्वाभ्यासेनरूढास्ते दृष्टातेषु
समानसो॥ अस्मिन्नजन्मनिनलोकं शिवंसंपूज्यंयाप्यहं॥ एषाच प्रहृतिस्तनयो:

समुद्रहितं॥ तथाचशिवब्रह्मक्रमाः किमन्यत्सृष्टुमिच्छसि॥८७॥ इति श्रीस्कंदपुरा
णे ब्रह्मोत्तरखंडे रुद्राक्षमहिमावर्णनंनामाष्टादशोध्यायः॥ सूतउवाच॥ एवंमहर्षि
णब्रह्मकंवाक्यंपीयूषसन्निभं॥ आकर्ण्यमुदितोराजाब्रह्मोवाच॥१॥
राजोवाच॥ अहोधन्यतमंपुण्यं अहोपार्थस्यसाधनं॥ कामधेनुरिवाभिष्टं दोषि
सर्वजनस्यच॥ अधुनायातमानष्टं ज्ञानदृष्टिःप्रकाशिता॥ पवनदर्शनमात्रेण प्रा
णोहममरोनमः॥ अस्मायुःकतिवर्षाणि प्राप्स्यंचवदकीदृशं॥ विद्याकीर्तिश्रशक्ति
श्रश्रुतापत्तिश्रकीदृशी॥५॥ एतत्सर्वंमहाभाग मुनेत्वंवक्तुमर्हसि॥ नवफलो
न्मोस्मिशिष्योस्मिशरणंवांगतोस्म्यहं॥६॥ पाराशर्यउवाच॥ अत्रनाऽन्यंहिय
ष्टंचित्कंचिन्मुक्तोतिसंसितुं॥ यच्छ्रुत्वाऽतिमनोपिनावादंप्राप्नुयुर्जनाः॥७॥

लंचापिनिर्मलेकेनभावनपरिपृच्छसि॥ अनाऽप्यमपिवस्यामितवस्नेहान्महिपते॥
॥८॥ अमुष्यबालकुमारस्यवर्षाणिदशपंचच॥ अतःपरंप्रपद्येतसप्तमंदिवसंखिलं
॥९॥ इतिस्ववचःश्रुत्वाकालकूटंचयोक्षितं॥ मूर्छितःसहसाभूमौपपातन्यपतिः
शुचा॥१०॥ उक्षाचसमाश्वास्यसमुनिःकरुणाकरः॥ उवाचमाभैन्यपनुपुनर्न
स्यामितेहितं॥११॥ स्वर्गासुरायदाऽलोकंयएकंनिष्कलंपदं॥ चिदानंदमयंज्योतिः
सआद्यः केवलंशिवः॥१२॥ सएवादोरजारूपं सृष्ट्वाब्रह्मणमात्मनः॥ सृष्टिक
र्मनियुक्तायतस्मैवेदान्प्रयत्नवान्॥१३॥ पुनश्चजगतामीशोमालतेलोकसंग्रहे॥
सर्वोपनिषदासारंरुद्राध्यायंचयत्नवान्॥१४॥ यदेकमक्षयंसाक्षाच्चिज्ज्योतिः
सनातनं॥ श्रीबालकंपरंतत्वंरुद्राध्यायंप्रचक्षते॥१५॥ सलोमभूःरजनवि

श्चं चतुर्भिर्वदनैर्विराट्॥ ससर्जसर्व्ववेदाश्चनुरोल्लोकानोस्खिनतनवे॥१६॥
तत्रायंयजुषांमध्यन्नलणोदक्षिणात्मुखात्॥ अरोषापनिषत्सारोरुद्राध्याये
प्रनिस्मृतः॥ १७॥ सएषमुनिभिः पूर्वमरिचत्रपुरागमैः॥ सहदेवेष्टतस्तस्य
लब्धिष्वा जगदुःस्मृतः॥१८॥ तच्छिष्यपुत्रैस्तत्पुत्रैस्तत्पुत्रैश्चक्रमाद्गतैः॥ हृतोरुद्रा
त्मकः सोयंवेदसारः प्रकाशितः॥ एषएवपरोमंत्रोएषएवपरंतपः॥ रुद्राध्यायज
पःपूंसांजोपरंकैवल्यसाधनं॥ २०॥ येमहापातकैर्युक्तोउपपातकिनश्चये॥ रुद्रा
ध्यायजपान्मुक्तापियोनिपरागतिं॥२१॥ भूपोपिन्नलणास्रष्टा स्वदासन्निश्चयो
त्पः॥ देवतीर्यग्मनुष्याधामृतः संपूरितं जगत्॥ २२॥ तेषां कर्म्मा स्रष्टानि स्वज

रत

णि

न्मानुगतानिच॥ लोकारतेषुप्रवर्तनेभुंजनेचेवतत्फलं॥ २३॥ लोकस्रष्टिप्रवा
हार्थंस्वयमेवप्रजापतिः॥ धर्मोधर्मौससर्जाग्रेस्वदाष्टष्टप्रागतः॥ २४॥
धर्ममेवानुतिष्ठंतपुण्यंवदंतितत्फलं॥ अधर्ममनुतिष्ठंत स्तेपापफलभागिनः॥२५॥
पुण्यंधर्मफलंस्वर्गोनरकस्तद्विपर्ययः॥ दयोदानंधियोधान्नं कृतोज्ञानमखंति
को॥२६॥ कामश्चक्रोधलोभश्चमदमानादयःपरे॥ अधर्मस्यकुलाअसन्॥
सर्वेनरकनायकाः॥ गुरुतल्पसुरापानंतथान्यःपुल्कसागमः॥ कामस्यतनयो
लेतेप्रोक्तान्यानत्सकीर्तिताः॥ २८॥ क्रोधस्तिनयोजातोनथामानवधपरः॥
अलहलेनकन्येकाक्रोधस्यतनयास्मृतौ॥२९॥ देवस्वहरणंचेवनलस्य
हरणंतथा॥ स्वर्णस्तेयंरतिर्लेतेलोभस्यतनयाःस्मृताः॥३०॥ एतान्याकुयचो

PAGE(S) MISSING
NOT AVAILABLE

Folio Nos.

85-86



ज्ञालान्यमः पातकनायकान्॥ नरकस्यविरुध्यर्थं अधिपत्यं चकारह॥२१॥
नेयमेनसमादिष्टा भवपातकनायकाः॥ नरकानूपूरयामासुः स्वघटेभ्यो
पपातकैः॥२२॥ रुद्रजाप्यंप्रवः प्रादात् सा हालेयन्यरोधनं॥ जिताः सर्वदुः
खैर्नरिपपातकनायकाः॥ यमंविज्ञापयामासुः सहान्ये निरुपातकैः॥॥
जयदेवमहाराजवयंहितवकिंकराः॥ २४॥नरकस्यविरुध्यर्थं अधिकारा
स्त्यावृता॥ अधुना॥ वर्तितुलोकेनशक्ताःस्मवयंप्रभो॥ रुद्रजाप्यानुभावे
नविदग्धास्त्वेवविद्विषः॥ सामग्रामनदीकूलेपुण्ये श्रायतनेषुच॥ रुद्रजा
प्यंसमासेकयंलोकेचरामहि॥ प्रापश्चितंसहस्रेणा गण्यादोनकिंचन॥रु
द्रजाप्यास्त्रराज्येन नमोदुःतन्नशक्नुमः॥२८॥ सहापातमुख्यानोजस्माकं

लोकघातिनः॥ रुद्रजाप्यनपलासेमपेनतुलमर्तसि॥ २७॥ इतिश्रीविलापि
तःसाक्षाघोरपातकनायकैः॥ न्नलपोनिकमासाद्यतस्मैसर्वंन्यजिपत
न्॥ देवदेवनगश्लात स्लाघतेशरणंगतः॥ लब्धयानिपुलोमर्षिनोनिम्न
पापकारिणं॥॥४२॥ अधुनापिनोमर्षिनसंतिष्टधवीतले॥ रुद्रजाप्यंप्रनि
हतंपातकानांकुलंमहत्॥ ४३॥ पातकानांकुलेनष्टे नरकःशून्यतांगतः॥
नरकेशून्यतांप्राप्तेममराज्यंहिनिःफलं॥ ४३॥ तस्मात्त्वमेवभगवान्उपायः
परिचिंतय॥ यथामेनविहन्येत स्वामित्वंसर्वदेहिनां॥ ४५॥ इतिविज्ञा
पितोधानायमेनपरिखिन्नता॥ रुद्रजाप्यविघातार्थमुपायंपर्यकल्पयत्॥४६

अश्वमेधाच्चवर्तुर्मेधाज्जन्मविघातयेत्।।अश्वमेधाविधानेन्योमर्त्ये
षुसमरोपयत्।।५७।।ताम्रपात्रेनिधायेतंश्लोकंरुद्राध्यायपरोजपेत्।।
स्वयंभूःस्थाणवेनीलाग्रीवायशिपिविष्टवे।।५८।।पूर्वजन्मकृतैःपापैःजा
यंतेन्यायुषाजनाः।।तानिपापानिनश्यंतिरुद्रजाप्यवतांनृणां।।५९।।
क्षीणेषुसर्वपापेषुदीर्घमायुबलंधृतिः।।आरोग्यंज्ञानमैश्वर्यंवर्ततेस
र्वदेहिनां।।५०।।रुद्राध्यायेनदेवेशंस्नापयेन्निर्मलेश्वरं।।तज्जलैःकुर्वते
स्नानेतेमर्त्यसंतरंतिच।।रुद्राध्यायाग्निध्यानेनस्नानंकुर्वंतियद्विजाः।।
तेषांमर्त्यभयंनास्तिशिवलोकेमहीयते।।५२।।शतरुद्राभिषेकेनशता
युर्जायतेनरः।।अरोगपापनिर्मुक्तःशिवदर्पितोभवेत्।।५३।।एवरुद्रापु

नस्नानंकरोतुतवपुत्रकः।।दशवर्षसहस्राणिमोदतेशिवसन्निधौ।।५४।।
जप्त्वाहतर्बलेश्वर्यंहतशत्रुर्निरामयः।।निधूतरोगपापोघःशा
स्त्रेषुपरंगतः।।५५।।विप्रावेदविदःशांताविरक्तःशोभनव्रताः।।ज्ञान
यज्ञपरानिष्टाःसर्वतःसमदर्शिनः।।५६।।रुद्राध्यायजपःसद्यःसर्व
वेदेषुविप्रलाभदायकः।।तेषांज्ञानंतुसंजायेतसद्यःस्रोतोपविष्यति।।५७।।
रुद्रकल्पंनृपतिर्महामुनिर्नमेवत्रेसघर्मक्रियायुतः।।जघापरानप
मजाशापान्मुनीन्जघानपामारसहस्रशःक्षणात्।।५८।।तेविप्राःशा
तमनसःसहस्रपरिसंख्यकाः।।कलशानांशतंस्नाप्यपुष्पैरुद्रैरसेर्पितं।।५९।।

रुक्माङ्गायेनसंजाप्यनमुवरंपतिपुत्रकं॥ विधिवत्स्थापयामासुःसंप्रा
सेसप्तमेदिने॥ ६०॥ स्थाप्यमानोमुनिवरैःसराजन्यकुमारकः॥ अकस्मा
दिविरत्नस्यःक्षणंमूर्छामवापह॥ ६१॥ सहसैवप्रबुद्धोसौमुनिःस्मरस
ण॥ बध्वापादोनमहतादूरंनीत्वाप्लवंत्॥ ६२॥ एतादृशमहाक्लेश
क्रूतरक्षण॥ रक्तकंठंतंन्यपतत्कस्मलंमुनिसत्तमाः॥ अथोशीघ्रं
पूजयामासुर्धर्मराजामुमोचह॥ ६४॥ अथसर्वान्मुनिन्प्रणम्यदृष्ट्वा
णाजिन्मोचनं॥ पूजयित्वावरान्नेनभोजयित्वाचपार्थिवः॥ ६५॥ प्रतिगृ
ह्यशिष्टंतंपुनिनांमलवादिनां॥ पुत्रकार्थंपूजनेःसार्धंसभाप्यांस
पुपाविशत्॥ ६६॥ तस्मिन्समागतेवीरमुनिःसत्यार्थिनेः॥ अजगाम
नि

महायोगीदेवर्षिर्नारदःस्वयं॥ ६७॥ तंमागतंप्रेक्ष्यमुदंमुनिनांसार्धंसदस्येरा
जेर्मुनिश्रेः॥ प्रणम्यभक्त्याविनिवेशपीठेस्तोपचारंन्यपतिर्बभाषे॥ ६८॥ राजो
वाच॥ दृष्टंकिमस्तेनभवन्त्रिलोक्यांकिंचिदद्भुतं॥ तन्नोऽहिवयंसर्वेलब्ध
कामफलास्मः॥ नारदउवाच॥ अथचित्रंमहदृष्टंशोभनावनरत्नया॥ त
च्छृणुष्वफलाराजन्सहेमिमुनिपुंगवैः॥ ७०॥ अथधर्मकिरातायोविहिंतुंतवपुत्रकं॥
दंडहस्तोदुराधर्षोलोकमृत्युर्जयन्मदा॥ ७१॥ ईश्वरोपिविदित्वैवंनतवसुत्रंहंतु
मागतं॥ सहैवपार्षदैःकैश्चिद्विरूपंमनचोदयत्॥ ७२॥ उवाचगच्छमाक्रूरंतपु
त्रंहंतुमागतं॥ ग्रहीत्वासुदृढंबध्वादंडेनाप्यहनद्भृशं॥ ७३॥ तेनाघातेनजगदीश

संनिधिं शीघ्रं विदित्वा भगवान्यमः स्वयं॥ कृतांजलिर्देवजयस्तदीरयन्प्रण
म्यभूमौ निजगादभूलिनं॥ यमउवाच॥ देवदेवमहारुद्र वीरभद्र नमोस्तुते॥
निरागसिकथंमत्तो कोपस्तवसुसंस्थितः॥७४॥ निजकर्मानुबंधेनराजपुत्रेण
तापुनः॥ प्रत्युग्रघातमत्तो कोपरोधोवदप्रभो॥७५॥ वीरभद्रउवाच॥ दश
वर्षसहस्रायुः स्वराजातनयःकथं॥ विपतिमंतरायातिरुद्रस्यानाहतात्मनः॥७६
अस्मिंश्चेन्नवरंदेयोमदाक्रोपोनिवारितेः॥ चित्रगुप्तंसमाहूयप्रच्छयोधेनमान्चिरं॥
॥७८॥ नारदउवाच॥ अथाहूतःचित्रगुप्तोयमेनसहमागतः॥ आयुःप्रमाणं
तत्सुतोधारदृष्टःसचान्नवीत्॥७९॥ द्वादशाब्दंचतस्यायुरुक्तंकाश्यपिमस्य
च॥ पुनर्तेरव्यगंप्राह सचवर्षंयुतंजीवितः॥८०॥ अथमोनोमयोराजा वीरभद्रं

प्रणम्यच॥ कथंचिन्मोचयास्मत्तंदुर्नीरत्नंधनात्॥८१॥ वीरभद्रेणयुक्तो
यमोगान्निजमंदिरं॥ वीरभद्रश्चकैलासमहंप्रास्तवांतिकं॥८२॥ अनंत
वक्त्रमारोयंरुद्रजाप्यानुभावतः॥ मृत्योर्मयमतिक्रम्यसुरवीजातोद्भुतसमाः॥
रक्तांतरूपमास्थायनारदंत्रिदिवंगते॥ महर्षयःप्रमुदिताःस्वंस्वंजग्मुरथाश्रमं॥
॥८४॥ इत्थंकाश्मीरंरुद्रप्रियाख्यानप्रभावतः॥ निस्तीर्यशोकदुःखानिकृता
पीपूलपूत्रकः॥८५॥ येकिर्तयंतिमनुजाःपरमेश्वरस्यमहात्म्यमेतदघकर्ण
पुटैर्भवंति॥ तेजन्मकोटिकृतपापगणैर्विमुक्ताः शांताप्रयांतिपरमंपदमिंदुमौ
लेः॥८६॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेरुद्रशर्माख्यानमहिमावर्णनंनाम
एकोनविंशतितमोध्यायः॥ ५९॥ सूतउवाच॥ अथाहंसंप्रवक्ष्यामिसर्वधर्मा

नमोस्तुते॥ उमामाहेश्वरेनाम्नेतेसर्वार्थसिद्धिदं॥१॥ आनर्त्तेनगरेकश्चि
त्कन्याम्लेच्छेद्विजः॥ कालञ्जपुत्रसंपन्नोविद्वानुत्तमवंशजः॥२॥तस्यै
वंवर्तमानस्यब्राह्मणस्यगृहाश्रमे॥ बभूवशारदानाम कन्याकमललोचना॥३॥
तांरूपलक्षणोपेतांनवलांद्वादशहायनां॥ यथाचेप्सितनाम्नाश्वेतो दारश्च
स्वद्विजः॥४॥महाधनस्यज्ञातस्यसर्वदाचाररतस्यच॥ योग्यांकन्यांप्रदौपित्रा
तांकन्यांप्रददौपिता॥५॥मध्यंदिनेगतेदाहेःस्वविप्रस्यसुरालये॥ संध्यामु
पासितुंसोमेसरस्तद्मुपाययौ॥६॥उपास्यसंध्यांविधिवत्प्रत्यगच्छत्तमो
ऽनेः॥ मार्गेदिशोभुजंगेनप्रमादनिजकर्मणा॥७॥तस्मिन्मृतेगतेदाहेसर्व्वसा
न्त्वमोभवा॥ चुक्रुशुःकोप्यशोकसंतप्तोस्यसुराधस्यकन्यका॥८॥तच्छ्रुत्वा

ऽवधुजनंजग्मुःस्वंस्वंनिकेतनं॥ शारदाप्रासवेधव्याप्यतुरेबालयेस्थिता॥९
मृतेभर्तरिसाध्वीनपतौविरहातुरा॥ निर्धनापक्वचिन्नास्यान्नालापिपे
तृमंदिरे॥१०॥एकदानेभुजोनामकश्चिद्दुष्टनरोमुनिः॥ जंघः शिष्यकरस्ता
हीतन्मंदिरमाययौ॥११॥तस्मिन्दृष्टेगृहेप्राप्तेनतुष्टाप्यवंधुषु॥ सा
दिनालनोदेवं सालालासमुपाचरत्॥१२॥ स्वागतंतेमहाभागपीठेस्मिन्नुप
विश्यतां॥ इमरतेमुनीनाथामयिपंतेकरोम्यहं॥ इत्युक्त्वामुक्तिमार्गस्थंकृ
तपादावनेजनं॥ विजयिलापरिप्राप्तंतंमुनिंपर्यतोषयत्॥१४॥प्राप्तंपीठे
समावेश्यकृत्वास्वंगंस्वपाणिना॥ कृतस्नानंचविधिवत्कृतदेवार्चनंमुनिं॥१५॥
सुखासनोपविष्टंतंभूपप्रान्त्यानुलेपनैः॥ अर्चयित्वावरान्नेनभोजयामासतां
दरं॥१६॥

मुक्त्वा सम्यक् ज्ञानकैवल्यसंध्यानंदनिरतः॥ वचकारचमुनिस्तस्मै सुप्रीतःपरमर्षिः॥५७॥ विहस्य पार्वती सहसा चेतनस्थाय सुतं सर्वगुणैर्वरिष्ठं॥ किंचिच्चलो केमहतीमवाप्य प्रसादयोग्यां फलदेगतानां॥५८॥ स्मयन्निव व्याहृतंतन्मुनिनागत चक्षुषा॥ निरूप्य विस्मितबाला प्रसूवाच कृतांजलिः॥९९॥ अंबस्य स्वदर्शनं सर्वकदाचिन्नमृषाभवत्॥ तदेतन्मदभाग्यायो कथमेतत्फलिष्यति॥२०॥ शैलायाविवसद्दृष्टिःसुतकोपिवसस्त्रियां॥ विफलामदभाग्यायामासीन्नैल विदामपि॥२१॥ सैषाहं विधवाबंधनिष्पुत्रंफलदामिनी॥ नवा हीर्नस्मारयञ्च कथंवास्यामि पात्रतां॥२२॥ मुनिरुवाच॥ यामनालक्ष्यतत्कालं येनाभिमयो च्युता॥ तदेतावधिष्यामि कुरुमच्छासनंशुभे॥ उमामहेश्वरं नामव्रतं यदि।चरिष्यसि॥ तेनव्रतानुभावेन सद्यःश्रेयोनुभोक्ष्यसे॥२४॥ रामरोवाच॥ त्वयोपदिष्टं

मलेन चरिष्यामिचतुर्थ्यरं॥ नव्रतंब्रूहिमेब्रह्मन्विधानंवदविस्तरं॥२५॥मुनि रुवाच॥ चैत्रेवामार्गशिर्षेवा शुक्लपक्षेशुभेदिने॥ व्रतारंभंप्रकुर्वीत यथान ज्ञुर्वनुत्तया॥२६॥ अष्टम्यांचतुर्दश्यामुभयोरपिपक्षयोः॥ संकल्प्यविधिवद्विद्वा न्प्रातःस्नानंसमाचरेत्॥ संतर्प्यपितृदेवादिन्गत्वास्वभवनंप्रति॥ पंचप्रस्थंरचयेद्दिव्यं विनानाधेरलंकृतं॥२८॥फलपल्लवपुष्पाद्यैस्तोरणैश्चसु शोभितं॥ पंचवर्णैरक्षतैश्चान्यैरंजोभिःपरमुद्धरेत्॥२९॥चतुर्हस्तलंबा हे द्वेत्रिंशद्धस्तविस्तरंतरे॥ तदंतरेषोडशहस्तविष्कंभंतरे॥३०॥ एवंपंच रत्नंतु धृत्वापंचवर्णंमनोरमं॥ चतुस्रंचततःकुर्यादंतवर्तुलमुत्तमं॥३१॥ ग्रहिंडुत्तरांसीध्यन्नग्नेरन्तकूर्वंचे॥ कूर्चोपरिसुसंस्थाप्य कलशंधान्य

पूरितं॥२२॥कलशोपरि विन्यस्य वस्त्रं वर्णमनुत्तमं॥तस्योपरि क्षुद्रहैमं वर्णं न
तिमशिनपोःशुभं॥२३॥निधायपूजयद्भक्त्या यथाविभवविस्तरं॥पंचामृ
स्था तैरक्तसंस्नाप्यतथाशुद्धोदकेनच॥कृत्वैकादशकंजस्थापंचस्वरशतानष्टकं॥
आमिमेन्यपुनःस्नाप्यपीठेहेममयेचपत्॥२५॥स्वयंचापिपठेत्तत्रशि
वाभ्यांनिहितोजलिः॥यानिपापानिघोराणिजन्मांतरकृतेषुमे॥२६॥
तेषांसर्वविनाशायशिवपूजांसमारभेत्॥स्वाम्यायविजयायारोग्यधर्मश्चर्या
भिवृद्धये॥२७॥स्वर्गोपवर्गसिध्यर्थंकरिष्येशिवपूजनं॥इतिसंकल्प्यसुर्ज्ञो
र्यंयथाशक्त्युपचारतः॥२८॥अंगन्यासंततःकृत्वाध्यायेदीशंचपार्वतीं॥कुंदेंदु
धवलाकारंत्रिनेत्रंपरमेश्वरं॥२९॥वरदाभयहस्तंचविद्याणंपरशुंमृगं॥

सूर्यकोटिप्रतिकाशंजगदानंदकारकं॥४०॥जान्हवीजलसंसिक्तदीर्घपिं
गजटाधरं॥उरोरुफलाभूतफलापुरुकुटमंडितं॥४१॥शीतांशुखंडविलसलो
हितांगदभूषणं॥उमालक्षालनयनंतथासूर्यंदृलोचनं॥४२॥नीलकंठंचतुर्बा
हुंगजेंद्राजिनवाससं॥रत्नसिंहासनारूढंनानाभरणभूषितं॥४३॥देवीचदि
व्यावपुषंबालसूर्यसमद्युतिं॥बालेंदुशोभितजटंबालशीतांशुशेखरां॥
॥४४॥पाशांकुशाभयवरान्बिभ्रतीं चचतुर्भुजां॥प्रसादसुमुखीमंबांलिली
रसविलासिनीं॥४५॥रक्तोत्पलकुवलयशोकपुन्नागचंपकैः॥कृतानंसा
मुकुल्लमल्लिकोल्लसितालकां॥४६॥कांचिकलापपर्यंतजघनांभोगशालिनीं॥
उदारकिंकिणीश्रेणीपूरितादयपदद्वयां॥गंडमंडलसंसक्तरत्नकुंडलशोभिनं॥

लिंगाधरानुरक्तांशुकसदृशनकुप्रक्तं॥४७॥मलाहरलेपनेवेद्यनारहरविराजितं॥
नवप्रवालिकयुक्तचिरबंधकणाग्रदमुद्रिकं॥४९॥रलांशुकप्रदीपानारलदीप्त्या
नुलेपनं॥उत्तीर्णितनुक्षेत्रदंदिनीप्रोक्षणस्थलं॥५०॥नीलोत्पलोत्पलितापां
शुंमन्त्रानुग्रहपायतं॥एवंप्रयोगहस्तेनुज्ञानःपितरोहिनो॥५१॥जलानदत्त
वंमंत्रेनदत्तेबलिरर्चयेत्॥आसनप्रतिमापुष्पैवल्यपदासनादिकं॥५२॥उद्ध्यं
चदद्याद्धवोमंत्रेणानंतमंत्रवित्॥५३॥नमस्तेदेवदेवेशपद्मनाभसनातने॥
अंबिकेवरदेदेवीगृहाणार्घंशिवप्रिये॥५४॥इतिस्त्रीयासुआर्यदद्यादर्घंसमा
हितः॥गंधपुष्पाक्षतान्सम्यक्धूपदीपान्प्रकल्पयेत्॥५५॥नैवेद्यंपायसान्ते
प्रतांकंपरिकल्पयेत्॥नुडुप्यान्तुलमंत्रेणहलिषाहोत्तरंहतं॥५६॥ततु

पनैवेद्यंधूपनीराजनादिकं॥बलानैवेद्यतोबुलंनमस्कुर्यात्समाहितः॥५७॥
उत्थाप्यर्क्षोपचारेणप्रोक्षनहिनदेपतं॥एवंस्त्रीयंतनीपूजांकृत्वाचविप्रानुभो
दितः॥५८॥भुंजितस्त्रीयतोरात्रौहविष्यंक्षिरपायिनं॥एवंसंवत्सरंकृत्वा द्वृतं
पक्षद्वयेबुधः॥५९॥ततःसंवत्सरेपूर्णेव्रतोद्यापनमाचरेत्॥शक्तश्चाज्यसे
रतोःस्नापयेत्तिमंजलैः॥६०॥उत्तमोक्तेनमंत्रेणसंपूज्यगिरिजांशिवां॥
सवस्त्रंरत्नसुवर्णंचकलशंप्रतिमान्वितं॥६१॥दत्वाचार्यायमतेसदाचा
रतायच॥ब्राह्मणान्पोजयेद्भक्त्यायथाशक्त्याचपूज्यच॥दद्याच्चदक्षि
णांतस्मैगोहरण्यंवरादिकं॥पूजितस्तद्वतुस्तानसहेशजनवंधुभिः॥६२॥

एवंयः कुरुतेस्नानंब्रह्मलोकेनिगद्यते॥ त्रिःसप्तकुलमुद्धृत्यभुक्त्वाभोगान्यथेप्सितान्॥६४॥ इंद्रादिलोकपालानांस्थानंघुरमतःपरं॥ ब्रह्मलोकेचरमतोविष्णोर्लोकेचशाश्वते॥६५॥ शिवलोकमधश्चैवतन्नकल्पेशतंपुनः॥ भुक्त्वाभोगान्सुनिपुणान्शिवमेवप्रपद्यते॥६६॥ महाव्रतमिदंवत्सत्वमप्याचरसुव्रत॥ अतीवदूर्लभंवापिलप्स्यसेमनोरथं॥६७॥ इत्युक्तोमुनींद्रेणसनालोपुलिनात्पुरः॥ प्रसन्नहृदयोविप्रश्चक्रेदानंसुमनोरमं॥६८॥ अथतस्यासमायानाःपितृमातृसहोदराः॥ तंमुनिंसुखमासीनंदृष्ट्वाभूतभोजनं॥६९॥ सहसागत्यसर्वेनमश्चक्रुर्हर्षसंयुताः॥ प्रसीदनःप्रसीदेतिभणंतःपर्यपूजयन्॥७०॥

BHAU DAJI

ऊचुश्चैनंपरमार्थंश्चापुलिनंपरमंमुनिं॥ अद्यास्माकंकृतंसर्वंश्रुत्वाहर्षपरंयपुः॥७१॥ तेकृतांजलयःसर्वेनमूचुर्मुनिपुंगवं॥ अद्यधन्याःवयंसर्वेतवागमनमात्रतः॥७२॥ पावितंनःकुलंसर्वंगृहंचसफलंकृतं॥ इयंचशारदानाम्नाकन्यावैधर्ममार्गता॥७३॥ केनापिकर्मपाकेनदुर्विपाकेनभूयसा॥ सेषाघातवपादाब्जंप्रपन्नाशरणंसती॥७४॥ इमांसमुत्तारयास्मान्घोरादुःखस्यसागरात्॥ त्वयापितावदत्रैवस्थातव्यंनोगृहानिके॥७५॥ अस्मद्गृहमठेपस्मिन्स्नानपूजाजपान्विते॥ एषाबालापिसाधवंकुर्वंतीतवसार्चनं॥७६॥ ब्रतंतवसन्निधावेवचरिष्यतिमहामुने॥ मावत्समाप्ति

समायाति व्रतमस्यास्य दंतिके ॥७७॥ उषित्वा तावतस्त्रैव कृतार्घ्यान्कुरुक्षये
नो गुरो ॥ एवमभ्यर्चितः सर्वैस्तस्यामात्यजनादिभिः ॥ तयेति समुवाचेष्टजनो वा
समुपेत्य सः ॥ सापि तेनोपदिष्टेन मार्गेणागाद्विजालयं ॥ अर्चयंती व्रतं सम्य
क्चचार विमलाशयी ॥ ८० ॥ इति श्रीस्कंदपुराणे नागरोत्तरखंडे उमामाहेश्व
रव्रतनामविंशोऽध्यायः ॥ २० ॥ सूत उवाच ॥ एवं महाव्रतं तस्याश्चरंत्या गु
रुसंनिधौ ॥ संवत्सरावधीयाय नियमासक्तचेतसः ॥ ५ ॥ संवत्सरांते सा
बाला तत्रैव पितृमंदिरे ॥ चकोरोद्यापनं सम्यक्विप्रान्भोजनपूर्वकं ॥ २
दत्वाच दक्षिणां तेभ्यो ब्राह्मणेभ्यो यथार्हतः ॥ विसर्ज्यतान्व्रतमस्थापि

तमापनं दिना ॥ ३ ॥ उषोषितास्यंतस्मिन्दिनेनियममास्थिता ॥ जजापप
रमंमंत्रंउपदिष्टंमहात्मना ॥ ४ ॥ अथप्रदोषसमयेप्राप्तेसंपूज्यशंकरं
॥ तस्मिन्गृहांतिकपदेगुरोस्तस्यचसंनिधौ ॥ जपार्चनपरतासाध्वीभ्यांप
नीपरमेश्वरैः ॥ तस्मिन्जागरणेरात्रौयुवतिस्त्रीगणांतिके ॥ ६ ॥ तस्यांरात्रौ
तयासार्धंसमुनिर्जगदंबिका ॥ जपध्यानतपोभिश्चतोषयामासपार्वतीं ॥
॥ ७ ॥ तस्याश्चभक्त्याव्रतपाविताया मुनेस्तपोयोगसमाधिना ॥ तुष्टाभवानी
जगदेकमाता प्रादुर्बभूवाशु सुरक्तकांतमूर्त्तिः ॥ प्रादुर्भूतायशोरीनयारुणेज
गन्मयी ॥ अंधोपितृष्णादेवमुनिःप्रापदृशोर्दयं ॥ ९ ॥ तांवीक्ष्यजगतांधात्री

मापि भूतांपुरःस्थितां॥ निपेततुस्तसदसो॥ समुनिःसाच कन्यका॥१०॥तो भक्तिभावाकृतिनामयाराया नानंदबाष्पाक्षितसर्वगात्रौ॥ उद्यापदेवी कृपयापरीकृतात्रिण्मावभाषेऽरुंधत्यनुकामधीणा॥५७॥ प्रीतास्मितेमुनि श्रेष्ठवरेणप्रीतास्मितेनघे॥ किंवादृशम्यभिमतंदेवानामपिदुर्लभं॥१२॥ मुनिरुवाच॥ एषातुरारदानामकन्यातुगतपतिका॥ मयाप्रतिश्रुतंचास्ये तुष्टेनगतायुषा॥५३॥ स्तपत्नीचिरंकालं भित्वसुतमुत्तमं॥ ऊर्ध्वस्थिति मयाप्रोक्तेसतंकुरुनमोस्तुते॥५४॥ देवीउवाच॥ एषापूर्वभवेबालाद्रा विडद्विजन्मनः॥ उद्वासीदितीयदयिता भामिनीनामविश्रुता॥ ५५॥ साक्षत्

प्रेषसीनिसंकुपमाधूयपेशला॥ मर्त्तारंवशमानिन्येरूपवद्यादिकैःस्तवैः॥ अस्यांनिषक्तहृदयः सविप्रोमाहयंस्थितः॥ कदाचिदपिनेगाग्ज्येष्ठपत्नी पतिव्रतां॥५७॥ अनन्यागमनाद्रचुः सानारीपुत्रवर्जिता॥ सहास्तोकेनसंतप्ता कालेनमित्तयंगता॥५८॥ अस्याग्रहसमीपस्थोपाध्यिद्धालणोमुवा॥ इमांवीक्ष्यघनापूर्णां कामार्त्तःकरमग्रहत्॥५९॥ अनयारोषनाभाम्याप्या सविप्रस्तवधीरितः॥ इमांस्मरन्दिवानक्तंनिधनंप्राप्तवान्॥२०॥ एषासं ज्ञोहभर्त्तारंज्येष्ठपत्नीपराम्मुखं॥ चकारतेनपापेनसाऽस्मिन्विधवाभव त्॥२१॥ याःकुर्वंतिस्त्रियोलोके जारापत्योविपर्ययं॥ तासांकौमारदेवर्यएक

पिंडनिर्जन्मनि॥२२॥यतेतपापूर्वभवेमसूनामहनीक्षणा॥तेनपुष्पेनयत्पापं
नष्टंसर्वंनदेवहि॥२३॥योविप्रःविरहार्त्तःसन्मृतःकामविमोहितः॥सोस्याःपा
णिग्रहंकृत्वाभवेस्मिन्निधनंगतः॥२४॥प्राग्जन्मपतितस्याःपांप्रराष्ट्रे
पुत्रोधुना॥जातोविप्रवरःश्रीमान्सदारःसपरिच्छदः॥२५॥ननक्तंप्रति
निर्द्दोषाप्रेष्मापितंगता॥प्रस्थेनरतिसुरवंयातिश्रेष्ठजागरणादपि॥२६॥
षष्ठ्यक्षरनिशानयोजनदूरंस्तोदशादितोद्विजनरःसच्चकर्मवायः॥एतो
वपूंप्रतिनिरामनसोपिरामःस्थप्नेषुपश्यतिचिरंरतिमादधानः॥२७॥एषावै
स्थप्नसंगत्यापत्नीप्रतिनिरंजनी॥कालेनलप्स्यतेपुत्रंवेदवेदांगपारगं॥२७॥

एवस्योनयोजातमात्मनश्चिरसंगमात्॥सोपिविप्रोस्थप्नेदृष्ट्वास्त्रीतिप्रेमप्रा
वितं॥२९॥अनयाराधितापूर्वंभवेसाहंमहामुने॥अस्येवरमदानायप्रादु
र्भूतोस्मिसांप्रतं॥३०॥सुतउवाच॥अथोवाचमलोदनीतांबालांप्रतिसादरं॥
अभिवत्समलाभागेश्रृणुमेपरमंमचः॥३१॥यदाकदाचिन्नारींकांपिदेशपुरानना॥
दृष्ट्वास्यसिस्वप्नप्राप्तास्यतेत्वंविचक्षणा॥३२॥त्वांदृष्ट्वातंसविप्रोपिसुचिरंस्थ
मलक्षणं॥तदापरस्परालापोयुवयोस्संभविष्यति॥तदास्वननंसंपद्यतस्मैदे
हिवधुंशुभं॥फलमस्यवृत्तस्यार्थंतस्यहस्तेसमर्पय॥३४॥ततःप्रबुद्धतस्यैव
वरोत्थेसुमध्यमे॥युवयोर्दैहिकःसंगोभावीस्वप्नरतोहितं॥३५॥कालांतरेच

लमापत्नेनस्मीन्बालेऽनेमा॥ अग्निंप्रविशतेनैव सहयास्यतिमत्सदं॥३८॥
सूतउवाच॥इत्युक्त्वाविरतेबाला तातंदत्वातस्यैमतोरमं॥ततोः संपश्यतोरेव क्षणेन
दर्शनंगता॥३९॥ सापिबालावरंलब्धापार्वत्याःकरुणानिधेः॥उमायापरमानंदं
दधूजयामासतंयुतं॥४०॥तस्यांरात्र्यांव्यतीतायांसमुत्तिलब्धलोचनः॥ तस्याः
पित्राभ्रतःसर्वंरहस्याचष्टसारतं॥४१॥अथसाबालुपाख्यानंमत्वाशारदोचय
ज्ञास्वानी॥ विधायानुग्रहंतेषांययौस्वरगानिर्वृतिः॥४२॥एवंदिनेषुगच्छत्सु
साबालाचप्रतिक्षितं॥पत्युःसमागमंलब्धेस्वप्नेसुरवनिधर्धनं॥४३॥गौर्यो
वरप्रसादेनशारदाविज्ञदत्तना॥दधारगर्भंस्वप्नेपिपत्युःसंगसुभावनः॥४४॥

तोभ्युत्थापयत्सद्यःशारदांकोमलेजनी सनी॥ सर्वेपिप्रीतिमंतोचुःजारिणी
विजगुर्जनाः॥४५॥ सर्पदष्टस्यतद्भर्तुःयेतानिकुलबांधवाः॥तांस्तान्दृष्ट्वा
श्रवोसुलाघयुस्तस्मिन्मंदिरे॥४६॥अथसर्वेसमायाताग्रामद्वाश्यमंत्रिताः॥
समाजंचक्रिरेतत्रकुलद्वेषैःसमन्विताः॥४७॥अंतर्वत्नीसमाहूयशारदांविन
तानना॥ अंतर्जग्मतुसंक्रुद्धाःकेचिद्दासत्वपराःस्त्रियः॥४८॥अथिजा
स्थिपुर्वृत्तेकेनतत्रेथिचिंतितं॥अस्मत्कुलस्यदुःकीर्तिरनयासलिनालिशे॥
रतिसंतर्जयंतस्तेग्रामद्वाश्यनिवासिनः॥ सर्वेसमंत्रयामासुःकिंकूर्मइतिमाथि
नः॥५०॥तत्रोचुःकेपितेदृष्टाःतांबालांप्रतिनिर्दयाः॥एषापापमतिर्बाला कुल

DR BHAU DAJI LAD MUMBAI

दृष्टविनाशिनी॥ ५१॥ कुलास्याः केशबपनं छेलाकर्णेचनासिकां॥ निर्यास्य
तेबहिर्ग्रामात्तरिलक्ष्वास्पृग्जनः॥५२॥ इतिसर्वसमालोच्यतांतथावत्तुमु
घुनाः॥ अथांतरिक्षेसंभूताश्चत्वेवागग्रोचराः॥५३॥ आनयानयतंपापं
नचेन्नकूलदूषणं॥ अतरक्षोनचास्यासीत्तुचस्त्रेयमंगना॥५४॥ इतःप
रमियंनारी जारणीतिवदंति॥ तेषांदोषविमूढानांसघोजिह्वाविदीर्यते॥५५
इतर्तरिक्षजनिता वाणीश्रुत्वाऽशरीरिणी॥ सर्वंप्रजदुषुस्तस्याजननीजनकाद
यः॥५६॥ ततःसंपत्तमाःसर्वेग्रामवृद्धाःसमाजगुः॥ मूढूर्नेनोनमालंब्यकी
नासाःस्युरधोमुखाः॥ ५७॥ तत्रकश्चिद्विश्वासिध्यावाणीलवादिषुः॥
तेषांजिह्वाहिधापित्वावेमुस्तेपिलमीन्बहून्॥५८॥ ततःसंभूजयामासुः॥

तांवाक्तांतानिबोधनाः॥ बधुस्त्रियश्चत्याश्चराक्षसुधुसाधुध्वीति॥५९॥
मुमुचुःकेचिदानंदबाष्पबिंदूनितेत्तमाः॥ कुलस्त्रियःप्रसुतिनातस्मात्तिष्ठ
समाश्यसन्॥६०॥ अथतत्रापरेप्रोचुर्दैवंनहतिनान्यते॥ कथमेषादधोमर्म
शीलान्नस्खलितादपि॥६१॥ इतिसर्वान्त्रसम्यजनान्तुसंरायाविश्चेतसः॥
विलोक्यचक्रुस्तत्रैकोबपक्षेलोकतलस्थित्॥६२॥मायामिदंविश्वंदृश्यतेभूयते
ऽपत्॥ किंपाव्यंकिमपाव्यंसंसारेस्मिन्तरालके॥६३॥ अनिरुपमभूतार्थ
मायायांजायतेस्फुटं॥ ईश्वरस्यवशेनयातस्याःकोवेदचेष्टितं॥६४॥ युपके
तोभ्यराजर्षेशुक्रेनिपतितेजले॥ सपुत्रेतज्जलंपीत्वावेपाणंदधोकिल॥

मुनेर्धर्मांऽकस्यापि शुक्रांशी लासहोपसा।।हरिणी गर्भिणी भूत्वा ऋष्यशृंग
मसूयत।।६६।। सुराष्ट्रस्यतु धारासो शुक्रंस्टङ्कामटंगगता।।लक्षणाद्गर्भिणी
भूत्वा मुनिंप्रासूततापसं।। अथसत्यवती नारी शफरी गर्भसंभवा।।तथापिन
सुदेवेन रोहिण्यातनयोभवत्।। ६८।। इत्यादिमहर्षिणं शापेनच वरेणच।।आयु
कर्मापिपक्वंभुज्यतेनात्रसंशयः।।७०।। सोऽस्य ८जठराज्जातंमुशलंमुनिशा
पतः।। घुवनाम्नश्चगर्भोभून्मूनीनांगर्भगोत्रतः।। ७१।। नूनमेषापिकल्याणी
महर्षेर्वादसेवनात्।। मलाभतानुभावाच्च धत्तेगर्भमनिंदिता।।७२।। अस्मिन्वर्षे
ऽस्यनोसर्वेदृष्टंतुयोषितः।। ततोनिवृत्तसंदेहा भविष्यंतिमहाजनाः।।७३।।

ततस्तद्वचनादेवतोमदृष्टंस्त्रियोमिथः।। ताभ्यः ससंज्ञानसर्वेसास्वंमहद्भुतं।।
७४।। चिंतातार्थाःततः सर्वेमानयित्वाततः सतीं।। मोदमानाप्रहर्षंतःप्रपद्यु
स्वंस्वमालयं।।७५।। अथकालेशुभेप्राप्ते शारदाविमलाशया।। असूतनन्दनं
बालं बालार्कसमतेजसं।।७६।। सकुमारोमहोदारलक्षणः कमलेक्षणः।।
अवापमहतींलिप्सां बाल्यएवमहामतिः।।७७।। अथोपनीतोगुरुणा कालेलो
कमनोरमः।। सशारदेपरंलोकेख्यातिमवापह।।७८।। ऋग्वेदमष्टमंवर्षेनवमे
यजुषांगणं।। दशमेसामवेदंचैकादशेऽथमासुधीः।। अथत्रिलोकमहितं
प्राप्तेशिवपर्वणि।। शृण्वंतंप्रपठुःसर्वे जनाः सर्वज्ञमाशिनः।।८०।। शारदाभिस्व

पुत्रेणसहबंधुजनेनच॥ सहितापितृमातृभ्यांगोकर्णंप्रययौसती॥ तत्रापश्यत्सु
प्तायांतंसदास्वप्नेषुलक्षितं॥ पूर्वजन्मनिभर्तारंद्विजबंधुजनार्चितं॥८२॥तंदृष्ट्वा
प्रेमनिर्वाणपुलकांकितविग्रहा॥ निरुद्धबाष्पप्रसरातस्थौतन्मुखलोचना॥८३॥
सापिविप्रोपयंतंदृष्ट्वा सुरूपांचारुलक्षणं॥ स्वप्नेसदाभुज्यमानामालनारनिदा
यनीं॥८४॥तंकुमारमपिस्वप्नेदृष्टमातृशरीरजं॥विलोकविस्मयाविष्टानंदि
कमुपायथो॥८५॥पद्मलोचनुमिच्छामियंकिंचिन्मसीस्थितं॥इतिप्रश्नंमाप्राप्य
रहस्थानंनिनायतं॥८६॥कालेकियत्यवामास्तुस्वप्नार्थंसिसुव्रते॥कोदृक्षःक
स्यवापुत्रो किंनामेत्यवीज्जत॥इतितेनसमादिष्टासानारीबाष्पलोचना॥

व्याजहारमनोज्ञंवान्यैवंधव्यकारणं॥८८॥पुनःपप्रच्छतांबालःपुत्रःकस्या
यमुत्तमः॥ कथाध्यतोवाजठरेबालोयंचंद्रसन्निभः॥ शारदोवाच॥एषमेतनमः
स्थायिन्सर्वविद्याविशारदः॥ शारदेयरतिप्रीतोमदनोनेवकल्पितः॥९०॥
रतिस्तस्यावचःश्रुत्वाविहस्यप्रालपच्चमः॥ प्रोवाचकष्टंकष्टंहिचरंतंतवमा
यिनं॥९१॥पाणिग्रहणमात्रंतेकलानर्त्तमतःकिल॥ कथंचायंसुतोजातो
कस्यकारणमुच्यतां॥९२॥इतितेनादितोवाणीमाकर्ण्यानवलज्जिता॥क्षणेन
म्लानवीभूलाजैर्यादिवसमापपौ॥९३॥शारदोवाच॥तदलंपरिहासोक्त्यानलं
वेसिमलामहे॥ लामहंवेद्मिचार्थंसिन्प्रमाणंमनोज्ञानयोः॥१॥एकाकासर्व

मावेधदेव्यादत्तेनरादिकं।। ज्ञानस्यार्थंकुमारंचनरदीनस्येष्टनंजना।।९५।। सोपि प्रमुदितो विप्रः कुमारंसनिगृह्यतं।। विप्रोरत्नमनेनैवतो निनायनिजालयं।।९६ सापि स्त्रीलावहन्मासान्तत्रविप्रस्यमंदिरे।। तस्मिन्कालवशात्तेप्रविश्य ।।गितमन्यागात्।।९७।। ततः तौदंपतीभूत्वा विमानंदिव्यमास्थितौ।। दिव्यभोगसमायुक्तौ जग्मतुःशिवमंदिरे।।९८।। इत्येतत्पुष्यमाख्यानंमयासमनुवर्णितं।। पठतांशृण्वतांसद्योमुक्तिमुक्तिप्रदायकं।।९९।। अत्रापुत्रारोग्यसंपत्ति धनधान्यविवर्धनं।। पत्न्यासहयः शृणुयाच्छ्रावयेद्वा सभोगान् पदमेतिशाश्वतं।। इतिश्रीस्कंदपुराणेनलोचरखंडेशारदास्थानेनामैकविंशाध्यायः।। ।।२१।।

सुतउवाच।। एवंशिवनमःपंथाशिवेनैवप्रदर्शितः।।ऋणंसंस्तनिवर्तानांसद्यो मुक्तिकरःपरः।।१।। अथदुर्मर्षसोपुसांदेवद्यूतघकारिणां।। स्त्रीणांद्विजानिवंधूनांसर्वेषांचशरीरिणां।।२।। एवसाधारणःपंथासाक्षात्कैवल्यसिद्धिदः।। महामुनिजनैःसद्योदेवैरपिसुपूजितः।।३।। यत्कथाश्रवणंशंभोसंसारभयनाशनं।। सद्योमुक्तिकरंश्रव्यंपवित्रंसर्वसिद्धिदं।। अज्ञानतिमिरांधानांदिव्यज्ञानसिद्धिदः।। भवरोगानिबद्धानांसुसेव्यंपरमौषधं।।५।। महापातकशैलानांवज्रपातसुदारुणं।। अर्जनांकर्मचीनानांसाधनंसर्वसंपदां।।६।। येश्रण्वंतिसदाशंभोःकथांसुखनपावनीं।। तेवैमनुष्यलोकस्मिन्कृतार्थजनसंज्ञकः।। ।।७।।

शृण्वतां मूलिनोगाधो नाम्नकीर्तयतांतथा। तेषांपादरजःस्पर्शनीर्थानिमुनयोज
गुः।।८।। नस्मिन्निश्रेयसंगेतु येषि वांछंतिदेहिनः। तेशृण्वंतिसदाश्रव्यां श्रेयो
पोराणिकींकथां।। ९।। यश्चशक्तःसदाश्रोतुंकथांपोराणिकींनरः।। मूहूर्तंवापिशृणु
यान्नित्यंनाल्पादिने दिने।।१०।। अतःप्रतिदिनंश्रोतुमशक्तोयादमानवः।। पुण्यमा
सेषुवापुण्यदिनेपुण्यनिधौपि।।११।। यःशृणोतिकथांरम्यांपुराणेःसमुदीरितां।।
सनिरस्तरतिसंसारदग्ध्वा कर्ममहाटवीं।। मूहूर्तंवातदर्धंवा क्षणंवापावनींकथां।।
येशृण्वंतिनरापव्यान्नतेषामस्तिदुर्गतिः।। १२।। यत्फलंसर्वयज्ञेषुसर्वदानेषुयत्फलं।।
सत्पुराणश्रवणेनैतत्फलंविंदतेनरः।। १४।। कलौयुगेविशेषेणपुराणश्रवणादृते।।

नास्तिधर्मःपरःपुंसांनास्तिमुक्तिपथःपरः।।पुराणश्रवणाच्छेषोनास्तिसंकीर्तनंपरं।।
श्रुतएवमनुष्याणां कल्पद्रुमफलप्रदः।। १६।। कलौहिनायुषोमर्त्या दुर्बलाश्रमपीडि
ताः।। दुर्मेधसोदुःखभाजोधर्माचारविवर्जिताः।।१७।। इतिसंचिंत्यरूपाभगवान्
बादरायणः।। हितायतेषांविदधेपुराणाख्यंसुधारसं।।१८।। पिबन्नेदाम्रतंनित्यं
येकस्यादजरामरः।। इतिलोकधियाम्रतंकुर्यान्कुलमवजरामरं।।१९।। बालयुवाधव
लोवादरिद्रोदुर्बलोपिवा।। पुराणंतःसदावंद्यःपूज्यश्चसुहृतार्थिभिः।। २०।।।
नोचेद्युक्तिनकूर्मिनपुराणंतेकदाचन।। यस्यवक्त्रोद्गतावाणी कामधेनुःशरीरिणां।।
गुरुर्नःसंतिलोकस्यजन्मनोगुणवत्तयेः।। तेषामपिचसर्वेषांपुराणंतःपरंगुरुः।।२२।।

भवकोटिसहस्रेषु भूत्वा भूत्वा वसीदति॥ दर्शनात्पुनरादत्ते कोन्यस्तस्मात्परोगुरुः॥२३॥ पुराणज्ञः शुचिर्दांतः शांतो विजितमत्सरः॥ स्वादुः कारुण्यवान्वाग्मी वदेत्पुण्यकथां सुधीः॥२४॥ व्यासासनेसमासीनो मनोवाक्कायकोविदः॥ जोसमासः प्रसंगस्यनमस्कुर्यात्कर्हिचित्॥२५॥ ये भूतायेचभविष्यंतायेचान्येपि जिगीषवः॥ तेषां कुठिलरश्मिर्कमग्नेनैव वदेत्कथां॥२६॥ नदूरजनसमाकीर्णेनभूतार्थापदाढ्यवते॥ देशेनघूनसदनेवदेत्पुण्यनामकथां॥२७॥ सग्रामसुजनाकीर्णेसुक्षेत्रेवदेवतालये॥ पुण्येपुण्यनदीनीरेवदेत्पुण्यनामकथां॥२८॥ श्रोतारःसुखिनोयुक्ता नान्यकार्येषुलालसाः॥ वाग्यतासुचयोव्यग्राःश्रोतारःपुण्यभागिनः॥२९॥ ॥

अघक्षयेयेकथांपुण्यांशृण्वंतिभुवुजाधमाः॥ तेषांपुण्यफलंनास्तिदुःखंस्याज्जन्मजन्मनि॥३०॥ पुराणंयेत्वरंपूज्यतोबुलाघेकषायतः॥ शृण्वंतिचकथांपापक्षयाद्दरिद्राःस्युर्नपापिनः॥३१॥ कथायांकीर्तनामानामोघेगछंत्यन्यतोनराः॥ लोगोनरेप्रणस्यतिनेषांदाराभ्रसंपदः॥३२॥ तोदशीघमस्तकायेचकथांशृण्वंतिपापनीं॥ स्वनिशास्वादपंक्तेनानरकेयमकिंकराः॥ ३३॥ येतुतुंगासनारूढाःकथांशृण्वंतिदोषिकाः॥ अस्तंयंनरकान्यांतुक्तेभवंतिनायकाः॥३४॥ येचवीरासनारूढाःयेचपद्मासनस्थिताः॥ शृण्वंतिसत्कथांयेनेक्षनक्षजनिपादपाः॥३५॥ ॥असंप्रणम्यशृण्वंतोभिषद्वाक्यंवदंतिते॥ तथाशृण्वंतोभवंतिजगतांनराः॥३६॥

रामानाः

ANUPAM MISHRA MEMORIAL TRUST

प्रयंतिते॥ नराश्राद्धानाःशृण्वंतोयेशृण्वंतिकथांनकुःसमानास्तेनरास्तिष्ठंतः॥
पुरुतन्मेसमंपापंसंप्राप्यनरकंव्रजेत्॥३८॥योनंदतिपुराणज्ञानंकथांवापठ
त्यं॥तेवैजन्मनश्रांतमर्त्याःशुनकाःसंप्रयंतिते॥३९॥कथांयोवर्तमानांयोयेव
दंतिदुरुत्तरं॥तेगर्धाःप्रजायंतेबकलाश्चास्तनःपरं॥४०॥कदाचिदपिपुण्यं
नशृण्वंतिनराःकथां॥तेभुक्त्वानरकान्घोरान्प्रयंतिवनशूकराः॥४१॥येकथां
मनुमोदंतेकीर्त्यमानांनरोत्तमाः॥शृण्वंतोपिनयांतिश्वानंपरमंपदं॥४२॥
कथायांकीर्त्यमानायांविघ्नंकुर्वंतियेनराः॥कोद्यष्टान्नरकान्भुक्त्वाभवंतिग्राम
शूकराः॥४३॥येश्रावयंतिमनुजान्पुण्यांपौराणिकींकथां॥कल्पंकोटिशतंसा
ग्रं तिष्ठंतिपरमंपदं॥४४॥आसनार्घप्रयछंतिपुराणस्यचयेनराः॥केवला

जिनवासोसिमंत्रफलकंप्रयच्छ॥४५॥स्वर्गलोकंसमासाद्यभुक्त्वाभोगान्यथेप्सितान्
॥स्थित्वाकल्पशतंलोकेपुनर्यांतिनरोत्तमं॥४६॥पुराणश्रवणंदत्तेयोनिपरमंपदं॥
अन्नंवस्त्रंतथापुष्पंरत्नंहेमंनरोत्तमाः॥४७॥शृण्वंतोसर्वपापेभ्योविचित्रंसुम
नोहरं॥दक्षिणाप्रयछंतिसप्तद्वीपावसुंधरां॥अस्तिनत्रजनाःसर्वेमूढाधर्म
विवर्जिताः॥ब्राह्मणाश्चदुराचाराःश्रुतिस्मृतिपराङ्मुखाः॥४९॥जपस्वाध्यायरति
नाःपरस्त्रीविषयातुराः॥क्षत्रियाबलदर्पाश्चपरार्थहरणोद्यताः॥५०॥नजानंतिपरं
धर्मंज्ञानंवैराग्यलक्षणं॥स्त्रियश्चपापनिरताःस्थैर्यंत्यक्तापतिव्रताः॥५१॥दुर्जनाः
कुटिलगाःसदाचारविवर्जिताः॥नत्रैकोविदुरोनामदुराचारोद्विजोत्तमः॥५२॥
अस्तीदृशोपतिर्योसौसदाचारोपिकुमार्गगः॥सपत्नीवंजुलोनामद्विजोत्तमतिनिश्चयः॥

वेश्यापवनमासाद्यरमते स्मरपीडितः॥५४॥ स्वापितस्यांगनारात्नो विपुलाननयौवना॥ उत्सहेनी स्मरावेशेरेमेजारेण संगता॥५५॥ दृष्ट्वातस्याः पतिः कोपा दभिदुद्रा वसत्वरः॥ जारेपलायितेपत्नीमृतीसा खड्गराशयः॥ संतो ऽपुरुष्टवं धेनपुनः पुनः रनाऽयत्॥ सानारी भिऽीताभ्रूकुटिताप्राह निर्भया॥ पवान्नसि निशावेइयो रमते काग निर्भम॥५७॥ अहंरूपवतीयोवाकृपयौवनशालिनी॥ कथंसहिष्येका नार्नातनुसंगविनाजिता॥५८॥ रक्तकेःसतमान्व्यानाचाचमालणाधम॥ पुत्रो मेवलयोनहिनस्याद्दृष्टापितहिनं॥५९॥जारेभ्योधनमाददाते भ्योदेहिपरो रति॥ तद्दनंदेहिमेसर्वंपुण्यस्त्रीणांदृढापितत्॥६०॥एवंसंपूर्मतेकामोमयापिच वरानने॥ नेष्यतिमत्तुल्यंनरंनिजगदाहसाबधूः॥६१॥एवंतयोक्तदेपलोदुराचा

रम्रदनयो॥ कालेनतेधनंप्रासःसविप्रोवत्सलापतिः॥६२॥मृतेभर्तरिसानारीपुत्रैः सहनिजालये॥ उवासबहुचिरंकालंकिंचिदूनयौवना॥ एकदादैवयोगेनसं प्राप्तपुण्यैकर्मणि॥ सानारीबंधुभिःसार्धंगताकर्णेटनामयी॥६४॥तत्रनीर्घ जलेस्नालाकस्मिंश्चिद्दनालये॥ सुप्तावदैवतसुरतासुप्तापोराणिकीकथां॥ कोपिनंजारसक्तानांनरकेयमकिंकराः॥ संतप्तलोहपरिघंहिप्तंतिस्मरमंदिरे॥ ॥६७॥इतिपोराणिकानोक्तो साश्रुत्वासधर्मसंहितां॥ तमुवाचरहस्येवं नीताभालणे पुंगवं॥६८॥ अत्रनरापापजानेनामपाचरितमुज्ज्वलेण॥ यौवनेकामचारेणको हिन्येनप्रवर्तिते॥६९॥इदंतदुच्यतेश्रुत्वापुराणंधर्मसंहितं॥ नीतिर्मतनीजाना

शरीरं नेपतेन्मुक्तः॥६९॥ भिन्नांडुरीहियासक्तोपापोस्मरविमोहितो॥अन्यस्यापि सुखस्यार्थेघोरांयास्यामिदुर्गतिं॥७०॥ कथंसहिष्येनरकेखंडशोदहनंतनं॥पुनः कथंपतिष्यामि संतप्तक्षारकर्दमे॥७१॥ कथंचयोनिलक्षेषु कृमीकीटखगादिषु॥ परिभ्रमामिदुःखार्घैःपीड्यमानोनिरंतरं॥७२॥ कथंहिरोचतेमह्यं जघन्यघृणितं भोजनं॥ राज्ञोकथंचसोवध्यः सिद्धोदुःखपरिप्लुतः॥७३॥ हाहाहतास्मिदग्धास्मि विदीर्णहृदयास्मिच॥हाविघ्नमामतापापदहाबुलिमपानयेत्॥७५॥पतनरूपं गर्हीलाग्नात्सूत्रात्रांतस्यदेहिनः॥यदुःखंजायतेघोरंतस्माकोटिगुणंमम॥॥ अस्यमेपशतंहत्वागंगास्नानंशतंसमाः॥नशुलिजोपतेन्नायोमत्सापस्यगरीयसः॥७७॥ किंकरोमिक्वगच्छामिकेवाक्ष्यंशरणमाश्रये॥कोवामोक्षयते

लोकेपतंतीनरकार्णवे॥७८॥ लप्तेनमेयुक्तमुक्तंलप्तालंपितासिच॥उद्धरोद्ध रमांदीनांत्वामेवशरणंगतां॥७९॥ इतिनोजातनिर्वेदापतनोंचरक्षणदये॥उच्छ्वा सपरायणमानवंप्राहद्विजपुंगवः॥८०॥ नारदउवाच॥दृष्ट्वाकालंप्रबुलासि स्थूलमोमहतींकथां॥मामेषालभतेवक्ष्यामिगतिंचैवसुखावहां॥सकथाश्रवणा देवजातोमेमतिरादृशी॥रंहिमाघेपुनरागंपश्चात्तापोमहानभूत्॥८२॥पश्चात्तापो हिसर्वेषांमहतांनिःकृतिःपरा॥तेनैवकुरुतेसद्यःप्रायश्चित्तंसुधीनरः॥८३॥ प्रायश्चित्तानिसर्वाणिलक्षाच्चविधिसुतः॥अपश्चात्तापिनामस्तोनपोनिगनिरुत्त मं॥८४॥सकथाश्रवणालिंसज्जनानांनिषेवनात्॥पुण्यक्षेत्रनिवासाच्चे चित्तशुद्धिःप्रजायते॥८५॥ यथासत्कथयानिसंचित्तंयातिनिपक्वतां॥नथान्येः

रत्नद्वैतेऽकेनोनप्रभेन्मतिरुत्तमा॥८६॥यथाबुद्धेरो ध्यानंदर्पणंदर्पणंनिर्मलं॥
प्रभेत्॥तथारत्नकथाश्चेतोविशुद्धिंपरमांव्रजेत्॥८७॥विशुद्धेचेतसिस्वस्थं
ध्यानंसिद्धमुमापतेः॥ध्यानेनसर्वसमलंपतोनाशंयसंपदेत्॥८८॥सधोनि६
धूपवृष्टिनोयांतिरोगाःपरंपदे॥८९॥अतःसमस्तपुण्यानांसत्कथासाधनंपरं॥
प्रा॰ कथयासिल्पनिर्ज्ञानंध्यानाकेवल्यमुत्तमं॥९०॥उसिद्धरिमलज्ञानःकथामवस्थ
ोनियः॥सोत्यजन्मनिसंप्राप्यध्यानात्यानिपरांगतिं॥नाभोधारणमात्रेण
जिताम्रफलजातिस॥॥पश्चात्तापसमायुक्तोध्यानेनपरमांगतिं॥९२॥सर्वेषां
मोपसंबीजंसत्कथाश्रवणंत्र्णं॥यतहिहिनोनृपशुः कथंमुच्येतबंधनात्॥
अतस्त्वमपिसर्वेभ्योविषयेभ्योविचक्षणैः॥धर्मकथांपरांसम्यक्शृणुसर्वदा॥९३॥

श्रुत्वाःसत्कथांनित्यंचेतस्तेशुद्धिमेष्यति॥तेनध्यायतिविश्वेशंतनोमुक्तिमवाप्स
सि॥९४॥ध्यायनःशिवपादाब्जंमुक्तिरेवेनजन्मना॥पिनिष्पतिनसंदेहःसप्तसप्त
चदाम्यहं॥९५॥रत्नज्ञातेननिःप्रेणसानारीबाष्पलोचना॥पतिलापदयोस्तस्य
नार्थोस्तिनिभाषत॥९६॥तस्मिन्नेवमहाहेतुतस्मादेवहिजोत्तमात्॥सुध्यानसत्क
थांसाध्वीकेवलंफलदायिनी॥९७॥सउवाचहिजस्तंत्वंकथांवेरागहेतुकां॥
योश्रुत्वामनुजःसद्यस्त्यजेद्विषयवासनां॥९८॥तस्याश्चित्तंयथाशुद्धंवैराग्यरस्था
रया॥तथोवाचद्विजःश्रेष्ठीकथांसत्फलसन्यितां॥९९॥यथायथामनस्तस्याः
प्रसादमधिगच्छति॥तथातथाशनैःश्रोतुंध्यानयोगमुपाविशत्॥१००॥शनैः शनैः
र्ध्वस्तरजस्तमोमलेपिकिंचित्कसर्वविषयेभोगविग्रहे॥विशुद्धसत्वेहृदयेद्विजोत्तमे

विवेश विश्वेश्वररूपचिंतने ॥ १०५ ॥ इत्थं सद्गुरुमाश्रित्य सानारी मासमन्वितः ॥
दृष्ट्वोमुहुर्मुहुः शंभोश्चिदानंदमयंवपुः ॥ निर्मलं निर्घृणं जलस्नातंजटाकवेकुलधा
रिणं ॥ भस्मोद्धूलितसर्वांगंकृष्णसर्पसुभूषणं ॥ १०६ ॥ शिवनामजपासक्तं वाम्य
गोपिनकोजनं ॥ रुद्राक्षमालयाकंठेदक्षेत्रिपुंड्रोज्ज्वलललाटकं ॥ १०७ ॥ गुरुमु
खोपदिष्टयोगेनयोगासनसमन्वितं ॥ विश्वेशं विश्वचित्तस्थं छिन्नजन्महेतुं विश्वैकबंधुं शिवंशाश्वतं विश्वरूपं ॥
विध्वस्तकालभयपीतगुणाब्धिपाशं श्रीमन्महेशमम दृष्टिकृपाकरं स्यात् ॥ ९ ॥ ॥
श्रीविश्वनाथकरुणाकरशूलपाणे भूतेशरागमुनिनंदयकालकीर्ति ॥ श्रीनि
लकंठमदनांतिकविश्वमूर्ते गौरीपतेममनिदृष्टिकृपाकटाक्षं ॥ १० ॥ ॥७॥

इत्थं प्रतिदिनंपत्न्या प्रार्थ्यमानंमहेश्वरं ॥ दृष्ट्वा नीलकपर्दीपुण्यकर्मबंधसमाछिनत् ॥
अथकालेनसानारी स्वपुत्रंज्यकलेवरं ॥ महेशान्तिकेमिनाजगाम शिवमंदिरं ॥ १२ ॥
नन्नदेवमहादेवं सेव्यमानंसनातनं ॥ गणेशानंदिनंशीशचीरचंद्रधरादिभिः ॥ १३ ॥
उपास्यमानंगौरीशं कोटिसूर्यसमप्रभं ॥ त्रिलोचनंपंचमुखंत्रिलग्नीवंसदाशिवं ॥
॥ १४ ॥ वामांगेबिभ्रतंगौरिंविद्युत्पुंजसमप्रभां ॥ दृष्ट्वारुद्रंसभार्यंनारीसाप्रणम्यपुनःपुनः ॥
आनंदाश्रुजलाप्लुतांगीरोमहर्षसमाकुला ॥ समानीताकरुणयापार्वत्यारुद्रेणचं ॥ १५ ॥
तस्मिन्नलोकेपदानंदनवज्योतिर्मयेस्थले ॥ दृष्ट्वानिवासमचलंशुभंसुखमनाहतं ॥
साकदाचिन्महादेवीमुपस्थेप्रणम्यच ॥ पर्यपृच्छन्महाभागीकांगतिंगतवानिति ॥ १६ ॥

तामुवाचमहादेवी सतेमर्नादुरात्मयः॥ मुञ्चकानरकदुःखानिचिंध्येजातः पिशाचकैः॥१९॥
पुनःप्रष्टुंसानारी देवीत्रिभुवनेश्वरी॥ केनोपायेनमर्त्यानां सद्गतिंप्राप्नुयादपि॥२०॥
श्रीदेव्युवाच॥ सोस्मत्कथांमहापुण्यांकदाचिच्छृणुयादपि॥ नीत्वासूर्यदुर्गांसंसर्वान्पि
तॄंल्लोकंप्रयास्यति॥२१॥ इतिगौर्य्यावचःश्रुत्वासानारीविहितांजलिः॥प्रार्थयामासतां
देवीमर्त्युःपापविशोधने॥२२॥तयामुक्तःप्रार्थ्यमानापार्वतीकरुणायुता॥तुंबरुनामगं
धर्वंसमाहूयेदमब्रवीत्॥२३॥तुंबुरोगच्छपद्मंतेविंध्येशैलसहानया॥आस्तेपि
शाचकस्तत्रयोस्याःपतिरसन्मतिः॥२४॥तस्याग्रेपरमांपुण्यांकथांस्मकुरुसत्वरं॥आ
ख्यायदुर्गानर्मुक्तंनमानयशिवांतिकं॥२५॥इतिदेव्यासमादिष्टस्तुंबुरुर्नारदप्रियः॥

तयासहविमानेनविंध्याद्रिंसहसायथौ॥२६॥तत्रापश्यन्महाकायंरक्तनेत्रंमहाहनुं॥विहसंतं
रुदंतंचबलांतंपिशाचकं॥बलाद्गृहीत्वातंपाशैर्बध्वासमुपवेश्यच॥तुंबरोवल्लकीहस्तोजघ्ने
गौरिपतेःकथां॥२८॥सपिशाचोमहापुण्यांकथांश्रुत्वासुरर्षिणः॥विधूमकल्मषंसर्वंसमाहृत्य
पसद्गतिं॥२९॥सपिशाचंचवपुरुत्सृज्यस्वरूपंदिव्यमास्थितः॥जगौस्वयंतस्मिंश्चरितं
पार्वतीपतेः॥३०॥विमानमास्थायसहिव्यरूपधृक्सतुंबरःपार्श्वगतःस्वकांतया॥गायन्मुहे
शस्यगुणान्मनोरमान्जगामकैलासंयदसौतदा॥३१॥सूतउवाच॥इतिनारदविंध्यपुण्य
ख्यानंपठतांपठतांहरेस्मरतांनिर्मलसंनिधौ॥३२॥यइदंकीर्तयेन्मर्त्यःशृणुयाद्वासमा
समाहितः॥शंभोर्गुणानुकथनंविचित्रंपापनाशनं॥३३॥परमंदेवंजनकंसर्वेषामपिहो
चं॥मुक्त्वेहविविधान्भोगान्मुक्तोयातिपरांगतिं॥३४॥चुयंबतमहाभागावृतार्थामुनिसत्त
माः॥येसेवंवसहरोमोकथामृतरसंनवं॥तेजन्मभाजःखलुजीवलोकेयेषांमनोध्याय

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तिविस्मरनाथं॥ वाणीगुणावस्तो निकथं॥ श्रुणोतिश्रोत्रदयंते भवदुन्नरंति॥३६॥ तिविधगुणवि
भेदं निसिमस्पष्टरूपं जगतिचवहिरंतर्भासमानंमहिम्नां॥ स्वमहसिनिरतंवाञ्छमनोदतिरूपं
परमशिवमनंतानंदसांद्रप्रपंच॥१३७॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेश्रवणानुवर्णनंना
मद्विविंशोध्यायः॥ २२॥ श्रीजगदंबार्पणमस्तु॥ रुद्रंपुस्तकंनारायणस्तज्ञवापुस्पटपुराणि
केनालिखितं॥ स्वार्च्यं॥पराधं॥

श्रीकोधनसंवत्सरदक्षिणायनेभाद्रपदमासेशुक्लपक्षेनवम्यांभो
मेभवासरेरुद्रंपुस्तकंलिखितं॥ ॥५॥ श्रीत्रिपुरसुंदर्यैनमः॥ श्रीशिवगुरवेनमः॥म॥

॥५॥ ॥७॥ ॥७॥